# B.A. 6th Semester (Honours) Examination, 2021
## Subject: Sanskrit

**Course ID: 60917 Course Code – AHSNS604/DSE- 4**

**Course Title – Kāvya**

**Full Marks – 40 Time– 2 Hours**

**क) अधोलिखितेषु पञ्चानां प्रश्नानाम् उत्तराणि लिखत।** 2X5 = 10

१) भट्टिकाव्यस्य अपरं नाम किम्? प्रथमसर्गस्य नाम किम्?

२) भट्टिकाव्ये कति सर्गाः? इदं काव्यं कीदृशम्?

३) अध्यैष्ट इति पदस्य व्युत्पत्तिः का?

४) उपास्थित इति पदस्य व्युत्पत्तिः का?

५) राजा दशरथः केन सह आसनम् अलञ्चकार? स कस्य देवस्य उपासक आसीत्?

६) कीदृश्याम् अयोध्यायां राजा दशरथो निवसति स्म?

७) पुत्रेष्टियागं कारयितुं राज्ञा दशरथेन को मुनिः आहूतः? स च कीदृशः?

८) कः मुनिः राक्षसानां विनाशाय रामं लक्ष्मणं च स्वीकर्तुम् आगतः? स च कीदृशः?

**ख) अधोलिखितेषु त्रयाणां श्लोकानां व्याख्यानानि लिखत।** 5X3=15

१) अभून्नृपो विबुधसखः परन्तपः श्रुतान्वितो दशरथ इत्युदाहृतः।
गुणैर्वरं भुवनहितच्छलेन यं सनातनो जनकमुपागमत् स्वयम्।।

२) वसूनि तोयं घनवद् व्यकारीत् सहासनं गोत्रभिदाध्यवात्सीत्।
न त्र्यम्बकादन्यमुपास्थितासौ यशांसि सर्वेषुभृतां निरास्थत्।।

३) स पुण्यकीर्तिः शतमन्युकल्पो महेन्द्रलोकप्रतिमां समृद्ध्या।
अध्यास्त सर्वर्तुसुखामयोध्यामध्यासितां ब्रह्मभिरिद्धबोधैः।।

४) निर्माणदक्षस्य समीहितेषु सीमेव पद्मासनकौशलस्य।
ऊर्ध्वस्फुरद्रत्नगभस्तिभिर्या स्थितावहस्येव पुरं मघोनः।।

५) आख्यन्मुनिस्तस्य शिवं समाधेर्विघ्नन्ति रक्षांसि वने क्रतूंश्च।
तानि द्विषद्वीर्यनिराकरिष्णुस्तृणेढु रामः सह लक्ष्मणेन।।

**ग) अधोलिखितयोः एकस्य भावसम्प्रसारणं कार्यम्।** **5X1=5**

अ. ते भिन्नवृत्तीन्यपि मानसानि समं जनानां गुणिनोऽध्यवात्सुः।

आ. परिभूरयोग्ये न मद्विधो न्यस्यति भारमग्र्यम्।

**घ) अधोलिखितेषु एकस्य प्रश्नस्य उत्तरं लिखत।** **10X1=10**

१) भट्टिकाव्यानुसारेण राज्ञो दशरथस्य गुणान् वर्णयत।

२) भट्टिकाव्यस्य रचयिता कः? तस्य देशकालकृतीः वर्णयत।

३) भट्टिकाव्यस्य प्रथमसर्गस्य सारः संक्षेपेण लेख्यः।